**Third Semester MA Sanskrit Vedanta (Private Registration)**

**Multiple Choice Questions**

SA040301 – Vedanta 4

1. सर्वदर्शनटीकाकारः इति प्रसिद्धः कः? (a) वाचस्पतिमिश्रः। (b) शङ्कराचार्यः। (c) पद्मपादाचार्यः। (d) तीर्थपादः।
2. वेदाङ्गानि कति ? (a) अष्टौ। (b) चत्वारि। (c) षट् (d) पञ्च।
3. अस्य च सुप्तं महाप्रलयः। कस्य? (a) वाचस्पतिमिश्रस्य। (b) परमात्मनः। (c) प्राज्ञस्य (d) जीवः।
4. भगवतो हरेः ज्ञानशक्त्यवतारः कः ?(a) वेदव्यासः (b) शङ्कराचार्यः। (c) वाचस्पतिमिश्रः(d) मध्वाचार्यः।
5. शाङ्करभाष्यं कीदृशं भवति? (a) गहनगम्भीरम्। (b) प्रसन्नगम्भीरम्। (c) करुणाकरम्(d) ललितम्।
6. स्फीतालोकमध्यवर्ती घटः कस्मात् अजिज्ञास्यः? (a) असन्दिग्धत्वात् (b) अप्रोजनत्वात्। (c) अज्ञातत्वात् (d) निष्प्रयोजनत्वात्।
7. करटदन्तः कस्मादजिज्ञास्यः?(a) असन्दिग्धत्वात्। (b) अज्ञातत्वात् (c) अप्रयोजनत्वात् (d) अभावात्।
8. बृहत्त्वात् बृंहणत्वाच्च कः एव ब्रह्मेति गीयते? (a) स्वयमेव (b) प्राण एव। (c) हिरण्यगर्भः एव। (d)आत्मैव।
9. ‘तदालम्बनत्वे योऽहं बाल्ये पितरौ अन्वभवं स एव स्थविरे प्रणप्तृन् अनुभवामि इति प्रतिसन्धानं न स्यात्’। किमालम्बनत्वे? (a) देहालम्बनत्वे । (b) इन्द्रियालम्बनत्वे। (c) बुद्ध्यालम्बनत्वे। (d) मनालम्पनात् ।
10. तदा अपि योऽहमद्राक्षं स एवैतर्हि स्पृशामि इत्यहमालम्बनस्य प्रत्यभिज्ञानात्। कदा अपि? (a) शरीरभेदे अपि (b) प्राणभेदे अपि (c) इन्द्रियभेदे अपि। (d) जीवभेदे ।
11. संसारः किंनिमित्तः? (a) आत्मयाथात्म्यानुभवनिमित्तः। (b) आत्मयाथात्म्याननुभवनिमित्तः। (c) कर्मनिमित्तः। (d) चिन्तानिमित्तः ।
12. इदमस्मत्प्रत्ययगोचरयोः इति वक्तव्ये युष्मद्ग्रहणं किमर्थम्? (a) संसारनिमित्तम्। (b) अत्यन्तभेदोपलक्षणार्थम्। (c) अत्यन्ताभेदोपलक्षणार्थम्। (d) ज्ञानोपलक्षणत्वात् ।
13. अरुणः स्फटिकः इत्यत्र कीदृशः विभ्रमः? (a) धर्मिणोः भेदग्रहणेऽपि तद्धर्मणामध्यासः। (b) धर्मिणोः भेदाग्रहणेऽपि तद्धर्माणामध्यासः। (c) धर्मिणोः भेदग्रहणेऽपि धर्म्यध्यासः। (d)भेदग्रहणाभ्यासः ।
14. आगमज्ञानं प्रत्यक्षस्य कीदृशं प्रामाण्यमुपहन्ति? (a) सांव्यवहारिकम्। (b) तात्त्विकम्। (c) प्रातीतिकम्। (d) केवलम्
15. तत्रैव गौणः अर्थः। कुत्र? (a) यत्र प्रयोक्तृप्रतिपत्त्रोः न सम्प्रतिपत्तिः । (b)यत्र प्रयोक्तृप्रतिपत्त्रोः असम्प्रतिपत्तिः। (c) सम्प्रतिपत्तिः ।(d) यत्र प्रयोक्तृप्रतिपत्त्रोः सम्प्रतिपत्तिः
16. सिंहो माणवकः इत्यत्र कीदृशोऽर्थःगृह्यते? (a) मुख्यः। (b) शक्यः। (c) गौणः (d) रूढः।
17. आत्मनः अणुपरिणामत्वे कीदृशप्रतीतिः न स्यात्? (a) अणुरहम्। (b) शरीरवानहम्। (c) स्थूलोऽहम् (d) सूक्ष्मोहम् ।
18. मिथुनीकृत्य इत्यत्र कः प्रत्ययः अभूततद्भावार्थस्य सूचकः ? (a) ल्यप्। (b) क्त्वा। (c) च्वि (d) तुमुन्।
19. स्मृतिरूपः परत्र पूर्वदृष्टाध्यासः इति लक्षणं कस्याः ख्यातेः सूचकं भवति? (a) अनिर्वचनीयख्यातेः । (b) आत्मख्यातेः। (c) अख्यातेः(d) ख्यातेः।
20. कति ख्यातयः सन्ति?(a) पञ्च। (b) चतस्रः। (c) तिस्रः(d) षट्।
21. तं केचिदन्यत्र अन्यधर्माध्यासः इति वदन्ति इत्यत्र का ख्यातिः सूचिता? (a) आत्मख्यातिः। (b) अनिर्वचनीयख्यातिः। (c) अख्यातिः(d) वचनीयः।
22. केचित्तु यत्र यदध्यासः तद्विवेकाग्रहनिबन्धनः रमः इत्यत्र सूचिता ख्यातिः का? (a) अख्यातिः। (b)आत्मख्यातिः। (c) असत्ख्यातिः(d) अनात्माख्यातिः।

23. अन्ये तु यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते इत्यत्र सूचिता ख्यातिः का? (a) अनात्माख्यातिः। (b) अख्यातिः। (c) अनिर्वचीयख्यातिः।(d) अन्यथाख्यातिः।
24. अनिर्वचनीयख्यातिवादिनः के? (a) बौद्धाः। (b) अद्वैतिनः। (c) नैयायिकाः।(d) जीनः।
25. आत्मख्यातिवादिनः के? (a) अद्वैतिनः। (b) विज्ञानवादिबौद्धाः। (c) नैयायिकाः।(d) वैशेषिकाः।
26. अख्यातिवादिनः के? (a) भाट्टमीमांसकाः। (b)प्राभाकरमीमांसकाः। (c) अद्वैतिनः।(d) बौद्धः ।
27. अन्यथाख्यातिवादिनः के? (a) प्राभाकरमीमांसकाः।(b) नैयायिकाः। (c) अद्वैतिनः। (d) बौद्धः ।
28. एकस्य अभिन्नस्य भेदभ्रमे कः दृष्टान्तः? (a) शुक्तिरजतम् (b)रज्जुसर्पः (c)एकश्चन्द्रः सद्वितीयवत् अवभासते। (d) मरुमरीचिका ।
29. कदा अध्यासः न भवति?(a) आंशिकग्रहणे। (b) आंशिकाग्रहणे (c) अत्यन्तग्रहे अत्यन्ताग्रहे। d) none of the above
30. परदर्शितदर्शिनः के?(a) पण्डिताः। (b) मुमुक्षवः । (c) बालाः । (d) मूढाः ।
31. अध्यासः केन व्याप्तः? (a) भेदाग्रहेण । (b) भेदग्रहेण । (c) अभेदाग्रहेण । (d) तुल्येन ।
32. सर्वो हि कीदृशे विषये विषयान्तरमध्यस्यति? (a) पुरोवस्थिते । (b) पुरोऽनस्थिते । (c) अप्रत्यक्षे । (d) शून्ये ।
33. चिदात्मा न एकान्तेन अविषयः। कस्मात्? (a) अस्मत्प्रत्ययविषयत्वात् । (b) युमत्प्रत्ययविषयत्वात् । (c) इदम्प्रत्ययविषयत्वात् । (d) स्वप्रत्ययविषयत्वात् ।
34. सर्वानर्थबीजं किम्? (a) अविद्या । (b) विद्या । (c) बुद्धिः । (d) प्रत्ययः ।
35. विवेकेन वस्तुस्वरूपावधारणं किम्? (a) विद्या । (b) अविद्या । (c) अज्ञानम् । (d) ज्ञानम् ।
36. कां पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः प्रवर्तन्ते? (a) अविद्याम् । (b) विद्याम् । (c) बुद्धिम् । (d) ज्ञानम्
37. कस्य अनुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तिः ? (a) प्रमेयत्वस्य । (b) प्रमातृत्वस्य । (c) शास्त्रस्य । (d) सर्वस्य
38. इतरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वं नाम किम्? (a) करणत्वम् । (b) कर्मत्वम् । (c) अधिकरणत्वम् । (d) कर्तृत्वम्
39. कानि अनुपादाय प्रत्यक्षादिव्यवहारः न सम्भवति? (a) कारकाणि। (b) इन्द्रियाणि । (c) ज्ञानानि । (d) करणानि ।
40. राजा राजसूयेन यजेत इति कस्य दृष्टान्तः? (a) आश्रमाध्यासस्य । (b) वर्णाध्यासस्य। (c)वयोऽध्यासस्य । (d) जन्माध्यासस्य ।
41. गृहस्थः सदृशीं भार्यां विन्देत् इति कीदृशस्य अध्यासस्य दृष्टान्तः ? (a) वर्णाध्यासस्य । (b) आश्रमाध्यासस्य । (c) वयोऽध्यासस्य । (d) जन्माध्यासस्य ।
42. ‘कृष्णकेशोऽग्नीनादधीत इति कीदृशस्याध्यासस्य दृष्टान्तः? (a) आश्रमाध्यासस्य । (b) वयोऽध्यासस्य । (c) अवस्थाध्यासस्य । (D) जन्माध्यासस्य ।
43. अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्यागः इति कीदृशस्य अध्यासस्य दृष्टान्तः? (a) वयोऽध्यासस्य । (b) वर्णाध्यासस्य । (c) अवस्थाध्यासस्य । (d) जन्माध्यासस्य ।
44. शारीरको नाम कः? (a) ईश्वरः । (b) परमात्मा । (c) जीवात्मा । (d) अन्यात्मा ।
45. पूजितविचारवचनः शब्दः कः? (a) जिज्ञासाशब्दः । (b) ज्ञानशब्दः । (c) मीमांसाशब्दः । (d) स्वशब्दः
46. अथैष ज्योतिः इत्यत्र अथशब्दः कस्मिन्नर्थे ?(a) आनन्तर्यार्थे । (b) मङ्गलार्थे। (c) अधिकारार्थे। d) none of the above
47. अथातो ब्रह्मजिज्ञासा इति सूत्रे कस्य शब्दस्य प्राधान्यं विद्यते? (a) ब्रह्मशब्दस्य । (b) ज्ञानस्य । (c) जिज्ञासाशब्दस्य । (d) सर्वस्य ।
48. अथशब्दस्य कः अर्थः भाष्यकारेण स्वीक्रियते? (a) अधिकारार्थः । (b) मङ्गलार्थः । (c) आनन्तर्यार्थः। (d) स्वार्थः ।
49. धर्मजिज्ञासा नियमेन किमपेक्षते? (a) वेदाध्ययनम्। (b) साधनचतुष्टयसम्पत्त्यानन्तर्यम् । (c) स्वर्गादिकम् । (d) नरकादिकम् ।

50. ब्रह्मजिज्ञासा नियमेन किमपेक्षते ? (a) विशेषज्ञानम् । (b) यागादिकम् । (c) स्वर्गादिज्ञानम् । (d) साधनचतुष्टयसम्पत्त्यानन्तर्यम्

51. स्वाध्यायानन्तर्यं तु समानम्। कयोः ? (a) धर्मब्रह्मजिज्ञासयोः । (b) धर्मब्रह्मणोः । (c) मोक्षस्वर्गयोः । d) none of the above

52. कति ऋणानि सन्ति? (a) त्रीणि । (b) चत्वारि । (c) पञ्च । (d) षट् ।

53. संयमनस्य पिण्डः इत्ययं कस्य दृष्टान्तः? (a) विकार्यस्य । (b) उत्पाद्यस्य । (c) संस्कार्यस्य । (d) स्वीकारस्य ।

54. अवघातस्य व्रीहयः इति कस्य दृष्टान्तः? (a) संस्कार्यस्य । (b) विकार्यस्य । (c) उत्पाद्यस्य । (d) सर्वस्य

55. प्रोक्षणस्य उलूखलादयः इति कस्य दृष्टान्तः? (a) प्राप्यस्य । (b) संस्कार्यस्य। (c) विकार्यस्य। (d) सर्वस्य

56. दोहनस्य पयः इति कस्य दृष्टान्तः? (a) विकार्यस्य । (b) प्राप्यस्य। (c) संस्कार्यस्य । (d) सर्वस्य

57. धर्मज्ञानं कीदृशफलं भवति? (a) निःश्रेयसफलम् । (b) कर्मफलम् । (c) मोक्षफलम् । (d) अभ्युदयफलम्

58. ब्रह्मज्ञानं कीदृशफलं भवति ? (a) स्वर्गफलम् । (b) निःश्रेयसफलम् । (c) अभ्युदयफलम् । (d) कर्मफलम् ।

59. धर्मब्रह्मज्ञानयोः किमनुष्ठानमपेक्षते?(a) ब्रह्मज्ञानम् । (b) धर्मज्ञानम् । (c) उभयमपि। (d) आत्मज्ञानम्

60. धर्मः कीदृशः? (a) भूतः । (b) नित्यनिवृत्तः । (c) भव्यः । (d) सर्वः ।

61. ब्रह्म कीदृशँ भवति ? (a) भव्यम् । (b) कर्मजन्यम् । (c) क्षिप्रम् । (d) भूतम्

62. ब्रह्मचोदना कीदृशी भवति? (a) पुरुषमवबोधयन्ती प्रवर्तयति। (b) पुरुषं प्रवर्तयति केवलम् । (c) पुरुषमवबोधयत्येव केवलम्। (d) केवलम् प्रवर्तयति ।

63. नित्यः कः ? (a) शरीरादिः । (b) स्वर्गः । (c) प्रत्यगात्मा । (d) प्रपञ्चः ।

64. वैराग्यहेतुकः मनोविजयः कः ? (a) शमः (b) दमः । (c) उपरतिः । (d) शान्तः ।

65. मनसः तत्त्वनिश्चययोग्यता क इत्युच्यते? (a) दमः । (b) शमः । (c) तितिक्षा । (d) उपरतिः ।

66. अतश्शब्दस्य कः अर्थः? (a) स्वार्थः । (b) आनन्तर्यार्थः । (c) मङ्गलार्थः । (d) हेत्वर्थः

67. फलं कीदृशं भवति? (a) अनुकूलवेदनीयम् । (b) प्रतिकूलवेदनीयम् । (c) अननुकूलवेदनीयम् । (d) सर्ववेदनीयनम्

68. ब्रह्महत्येत्यत्र ब्रह्मशब्दः कुत्र वर्तते? (a) परमात्मनि (b) विप्रत्वजातौ । (c) वेदे। (d) प्रकृतेः।

69. ब्रह्मोज्झमित्यत्र ब्रह्मशब्दः कुत्र वर्तते? (a) विप्रत्वजातौ । (b) वेदे । (c) परमात्मनि ।(d) जीविते

70. ब्रह्म वेद ब्रह्मैव भवति इत्यत्र ब्रह्मशब्दः कुत्र वर्तते? (a) वेदे । (b) परमात्मनि । (c) विप्रत्वजातौ । (d) जीविते

71. ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा इत्यत्र षष्ठीसमासः कस्मिन्नर्थे? (a) शेषे । (b) जीविते । (c) ब्रह्मसम्बन्धार्थे । (d) कर्मणि

72. ज्ञानेन प्रमाणेन अवगन्तुमिष्टं किम्? (a) स्वर्गादिकम् । (b) कर्मफलम् । (c) ब्रह्म । (d) नरकादिकम्

73. पुरुषार्थः कः? (a) स्वर्गलाभः । (b) कर्मफललाभः । (c) ब्रह्मावगतिः । (d) जीवितलाभः

74. नित्यशुद्धेत्यादीपदे क्षयितालक्षणस्य दुःखस्य अपाकरणं केन अंशेन ?(a) शुद्धेति अंशेन । (b) मुक्तेति अंशेन । (c) नित्येति अंशेन । (d) अनित्येति अंशेन ।

75. नित्यशुद्धेत्यादीपदे देहाद्युपाधिकस्य दुःखस्य अपाकरणं केन अंशेन ? (a) शुद्धेति पदेन । (b) नित्येति अंशेन । (c) बुद्धेति अंशेन । (d) अनित्येति अंशेन

Answer Key

| | | | | |
|---|---|---|---|---|
| 1-A | 16-C | 31-A | 46-C | 61-C |
| 2-C | 17-C | 32-A | 47-C | 62-D |
| 3-B | 18-C | 33-A | 48-C | 63-C |
| 4-A | 19-A | 34-A | 49-A | 64-A |
| 5-B | 20-A | 35-A | 50-D | 65-A |
| 6-A | 21-A | 36-A | 51-A | 66-D |
| 7-C | 22-A | 37-B | 52-A | 67-A |
| 8-D | 23-D | 38-D | 53-B | 68-B |
| 9-B | 24-B | 39-B | 54-B | 69-B |
| 10-C | 25-B | 40-B | 55-B | 70-B |
| 11-B | 26-B | 41-B | 56-B | 71-D |
| 12-B | 27-B | 42-B | 57-D | 72-C |
| 13-A | 28-C | 43-C | 58-B | 73-C |
| 14-B | 29-C | 44-C | 59-B | 74-C |
| 15-D | 30-C | 45-C | 60-C | 75-A |